उपशास्त्री - I खण्ड साहित्य - तृतीय पत्रम्

किरातार्जुनीयम् - प्रथमः सर्गः

प्र० (1) - द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः।
स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे॥

उत्तरम् - प्रसंग: - प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीयमहाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति।
अस्मिन् श्लोके वनेचरः युधिष्ठिरं प्रति कथयति - एकान्ते स वनेचरः, रिपूणामुच्छेदाय योद्योगं चिकीर्षोः राज्ञो युधिष्ठिरस्याज्ञां प्राप्य शब्दलालित्येनार्थगाम्भीर्येण च विशेषतः शोभमानामेवंप्रकारां वाचमुवाच।

व्याख्या: - रहसि = एकान्त में। सः = वह (वनेचर)। द्विषां = शत्रुओं के, विघाताय = नाश के लिए, विधातुं = (उद्योग) करने की, इच्छतः = इच्छा करते हुए, भूभृतः = राजा (युधिष्ठिर) से। अनुज्ञाम् = आज्ञा को। अधिगम्य = पाकर। सौष्ठवौदार्यविशेषशालिनीं = (शब्दों की) सुन्दरता और (अर्थ की) गम्भीरता - विशेष से युक्त, विशेष करके (युक्ति और प्रमाण द्वारा) निश्चित है अर्थ जिनका, ऐसी। इति = इस प्रकार की। वाचम् = वाणी को। आददे = कहने लगा।

Renu Devi
14/12/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया।

शास्त्री - खण्ड साहित्यम

अभिज्ञानशाकुन्तलम् - षष्ठोऽङ्कात्

classmate Date ______ Page ______

प्र० (१) - प्रथमं सारङ्गाक्ष्या प्रियया प्रतिबोध्यमानमपि सुप्तम् ।
अनुशयदुःखायेदं हतहृदयं सम्प्रति विबुद्धम् ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम नाट्यशास्त्रस्य षष्ठोऽङ्कात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके राजा अङ्गुलीयकदर्शनेन व्यपगतशापप्रभावः प्रबुद्धशकुन्तलावृतान्तो राजा तदानीं स्वं हृदयमधिक्षिपति । सारङ्गस्य ईक्षणे इवेक्षणे यस्याः सा तया सारङ्गाक्ष्या मृगलोचनया अत्यन्त हृद्यया प्रियया = शकुन्तलया प्रतिबोध्यमानमपि = बहुशो ज्ञाप्यमानमपि प्रथमं सुप्तमिव = मोहमुपगतमिव, जडमिव, इदं = मदीयं, हतहृदयं = दग्धहृदयम् अस्पृष्टसुप्तगन्धं दुष्टहृदयम्, सम्प्रति = अधुना प्रियायामसुलभदर्शनायामपि प्रियावियोगे जाते तु अनुशयदुःखाय = पश्चात्तापमनुभवितुं महत् क्लेशदातुमेव, विबुद्धः = जागरित इव ।

हे हृदयहतक! यदा मुनिकुमारकाभ्यां तापस्या च सह मे प्राणप्रिया शकुन्तला स्वयमुपस्थिताऽऽसीत् तदा मोहान्धेन त्वया तां मिथ्यावादिनीं निश्चित्य प्रत्यादेशपारुष्यं निराकरणं कृतम् प्रदर्शितम् । तदानीं त्वया सुप्तं संप्रति केवलं महत् दुःखमेव दातुं जागर्तीति भावः । अत्र विभावना विशेषोक्ति - अनुप्रासोपमा अलङ्कारा, आर्या वृत्तञ्च ।

Renu Devi
14/12/20

राधा उमाकान्त सं० महावि० सुरवसेना, पूर्णिया ।

उपशास्त्री-प्रखण्ड साहित्यम् तृतीय-पत्रम्

रघुवंश महाकाव्यम्-द्वितीय: सर्ग:

प्र०(1)- कैलासगौरं वृषमारुरुक्षो: पादार्पणानुग्रहपूतपृष्ठम् ।
अवेहि मां किङ्करमष्टमूर्तेः कुम्भोदरं नाम निकुम्भमित्रम् ॥

उत्तरम् प्रसंग:- प्रस्तुतोऽयं श्लोक: महाकवि कालिदास प्रणीतस्य रघुवंशमहाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके कुम्भोदर: राजा दिलीपं प्रति कथयति। सिंह: स्वपरिचयं ददद् उवाच - राजन्! यदा भगवान् सदाशिव: नन्दिकेश्वरमारोढुमभिलषति तदा मम पृष्ठे पादौ धृत्वैव तमारोहति, तेनैव शिवानुग्रहेण पवित्रपृष्ठभागो निकुम्भस्य सुहृत् कुम्भोदरनामाहं तव सम्मुखे स्थितोऽस्मीति जानीहि।

व्याख्या:- कैलासगौरं = कैलाशवदुज्ज्वलवर्णम्, वृषं = वृषभं नन्दिनम्, आरुरुक्षो: = आरोढुमिच्छत:, अष्टमूर्तेः = भगवत: शिवस्य, पादार्पणानुग्रहपूतपृष्ठं = चरणविन्यासप्रसादपवित्रपृष्ठभागम्, निकुम्भमित्रं = निकुम्भसखायम्, कुम्भोदरं नाम = कुम्भोदरनामकम्, किङ्करं = शिवानुचरम्, मां = सिंहम्, अवेहि = जानीहि।

Renu Devi
14/12/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया।

शास्त्री - II खण्ड साहित्य

रघुवंश महाकाव्यम् - त्रयोदशः सर्गः

प्र० (1) - इमां तटाशोकलतां च तन्वीं स्तनाभिरामस्तबकाभिनम्राम् ।
त्वत्प्राप्तिबुद्ध्या परिरब्धुकामः सौमित्रिणा साश्रुरहं निषिद्धः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य त्रयोदशसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके श्रीरामः सीतां प्रति कथयति - अयि प्रिये! पयोधरसदृशाभ्यां मनोहरपुष्पगुच्छाभ्यामवनतां तन्वीं तीरवर्तिनीमशोकलतां त्वमेव प्राप्तेति भ्रान्त्या आनन्दाश्रुं मुञ्चन् यदाऽहमालिङ्गितुं बाहू प्रसारितवान्, तदा लक्ष्मणेन आर्य! नेयमार्या वैदेही अपि तु इयमस्त्यशोकलतेत्युक्त्वाऽहं निवारित इति भावः।

व्याख्या :- प्रिये! स्तनाभिरामस्तबकाभिनम्राम् = पयोधरमनोहर गुच्छावनताम्, तन्वीम् = कृशाम्, इमाम् = एताम् । तटाशोकलताम् = तीराशोकवल्लीम् । त्वत्प्राप्तिबुद्ध्या = त्वदासादनधिया, त्वमेव प्राप्तेति भ्रान्त्या । परिरब्धुकामः = आलिङ्गितुमिच्छुः । अहम् = रामः, सौमित्रिणा = लक्ष्मणेन साश्रुः = अश्रुसहितः । निषिद्धः = नेयं सीतेत्युक्त्वा निवारितः।

Renu Devi
14/12/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।